इन्द्रत्वं भोक्ष्यते भद्रे ! सर्व्वदेवैर्नमस्कृतः ॥
सुखीभव महाभागे ! पुत्त्रेण तेन मे सदा ।
न प्रकाश्या त्वया देवि ! स्ववार्त्तेयञ्च कस्यचित्
कर्त्तव्यमज्ञानभावैः सुगोप्यं त्वं सदा कुरु ।
एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः ॥
कमलायाश्चोदरे वै चासीत् तज्जन्म चोत्तमम्
पुनः प्रह्लादो वै नाम तस्यां जातो महात्मनः ॥
बाल्यभावं गतो विप्र कृष्ण एवं विचिन्त्य च ।
नरसिंहप्रसादेन देवराजोऽप्यभूत् स हि ॥”
इति पाद्मे भूमिखण्डे ५ अध्यायः ॥ *॥
(अनेन सह नरनारायणयोर्युद्धमासीत् । एत-
द्विवरणन्तु देवीभागवते चतुर्थस्कन्धे नवमा-
ध्याये द्रष्टव्यम ॥) प्रमोदः । इति विश्वः ॥
(यथा, महाभारते । १ । ७० । ३ ।
“मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥”)
शब्दः । इति धरणिः ॥ (नागविशेषः । यथा,
महाभारते । २ । १० ।
“प्रह्लादो मूषिकादश्च तथैव जनमेजयः ॥”)
प्रह्वः, त्रि,(प्रह्वयते इति । प्र + ह्वे + “सर्व्वनि-
घृष्वरिष्वेति ।” उणा० १ । १५३ । इति वन् ।
आलोपश्च ।) नम्रः । इत्युणादिकोषः ॥ (यथा,
रघुः । १६ । ८० ।
“विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ॥”)
आसक्तिः । इति हेमचन्द्रः । ३ । ४८ ॥
प्रा, ल पूर्त्तौ । (अदा०-पर०-सक०-अनिट् ।)
ल, प्राति घटं जलेन लोकः । इति दुर्गा-
दासः ॥
प्राक्, व्य, पूर्व्वदिग्देशकालाः । इत्यमरः । ३ ।
४ । २३ ॥ प्राची दिक् प्राङ् देशः कालो वा
प्राक् । एवं प्राच्या दिशः प्राचो देशात्
कालाद्वा आगतः प्रागागतः । एवं प्राच्यां
दिशि प्राचि देशे वा वसति प्राग्वसति । दिक्-
शब्दाद्दिग्देशकाले इति प्रथमापञ्चमीसप्तमीनां
स्तात् अचो लुगिति स्तातो लुक् । इति तट्टी-
कायां भरतः ॥ (“दिक्छब्देभ्यः सप्तमीपञ्चमी-
प्रथमाभ्यो दिक्देशकालेष्वस्तातिः ।” ५।३।२७
इति अस्तातिः । “अञ्चेर्लुक् ।” ५ । ३ । ३० ।
अस्तातेर्लुक् । “लुक् तद्धितलुकि ।” १ । २ ।
४८ । इति स्त्रीप्रत्ययस्य लुक् ।)पूर्व्वम् । (यथा,
मनुः । २ । २९ ।
“प्राक्नाभिवर्द्धनात्पुंसो जातकर्म्मविधीयते॥”)
प्रभातम् । अवान्तरम् । अतीतम् । अग्रम् ।
इति हेमचन्द्रः मेदिनी च । चे, ७॥ क्रम-
प्राप्तिः । इति शब्दरत्नावली ॥
प्राकषिकः, पुं, (प्राकषति हिनस्तीति । प्र +
आ + कष् हिंसायाम् + “प्राङि पनिकषः ।”
उणा० २ । १४ । इति किकन् ।) षिड्गः ।
मायानर्त्तकः । इत्युणादिकोषः ॥ (परदारोप-
जीवी । इत्युज्ज्वलदत्तः ॥)

प्राकाम्यं, क्ली, (प्रकामस्य भावः प्रकाम +
ष्यञ् ।)शिवस्याष्टविधैश्वर्य्यान्तगतैश्वर्य्यविशेषः
तच्च इच्छानभिघातः । इत्यमरटीकायां भरतो
हेमचन्द्रश्च । २।११६ ॥ (यथा,तत्त्वकौमुद्याम् ।
“अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥”)
स्वाच्छन्द्यानुमतिः । तत्पर्य्यायः । अवसर्गः २
स्वाच्छन्द्यानुमननम् ३ । इति त्रिकाण्डशेषः ॥
(यथा, कुमारे । २ । ११ ।
“व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु॥”)
प्राकारः, पुं, (प्रक्रियते इति । प्र + कृ + घञ् ।
उपसर्गस्य घञीति दीर्घः ।) वप्रोपरि अन्यत्र
वा इष्टकादिरचितवेष्टनम् । (यथा, महा-
भारते । १ । २०८ । २९ ।
“प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता ॥”)
तत्पर्य्यायः । वरणः २ सालः ३ । इत्यमरः ।२।
२ । ३ ॥ शालः ४ । इति भरतः ॥ वप्रः ५ ।
यथा,—
“प्राकाररोधसोर्वप्रः पित्रकेदारयोरपि ॥”
इति रत्नकोषः ॥
तस्य परिमाणं यथा,—
“ऊर्द्ध्वं षोड़शहस्तेभ्यो नैव कुर्य्याद्गृहं गृही ।
ऊर्द्ध्वं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥”
तस्य द्वारमानम् ।
“प्रस्थे हस्तद्वयात् पूर्व्वं दीर्घे हस्तत्रयन्तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्यूनाधिके शुभम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः
प्राकृतः,त्रि,(प्रकृष्टमकृतमकार्य्यं यस्य ।) नीचः ।
इत्यमरः ॥ (यथा, देवीभागते ।१।१५।३१ ।
“अश्रुपातं करोत्यद्य विवशः प्राकृतो यथा ॥”
अविकारकः । यथा, भावप्रकाशे अजीर्ण-
रोगाधिकारे ।
“वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥
प्राकृतं अविकारकम् ॥”*॥) प्रकृतिसम्बन्धी ।
यथा,—
“इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः॥”
इति श्रीभागवते दशमस्कन्धे ३ अध्यायः ॥
(यथाच मार्कण्डेये । ४५ । ७३ ।
“इत्येष प्राकृतः सर्गः चेतनाधिष्ठितस्तु सः ॥”
यथा च मनौ । ११ । १५९ ।
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ॥”
“प्राकृतं प्राजापत्यं प्रकृतौ भवं प्राकृतं सर्व्व-
कृच्छ्राणां प्रकृतित्वादेवमुच्यते ।” इति तद्भाष्ये
मेधातिथिः ॥*॥ प्रकृतौ भवस्तत आगतो वा ।
प्रकृति + “तत्र भवः ।” ४ । ३ । ५३ । “तत
आगतः ।” ४ । ३ । ७४ । इति वा अण् ।)
भाषाभेदे, क्ली । स च संस्कृतप्रकृतिकः । यथा,
अथ प्राकृतम् । अथशब्द आनन्तर्य्यार्थोऽधि-
कारार्थश्च । प्रकृतिः संस्कृतं तत्र भवं तत

आगतं वा प्राकृतम् । संस्कृतानन्तरं प्राकृत-
मधिक्रियते । संस्कृतानन्तरं प्राकृतस्यानुशास-
नम् । सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य
लक्षणं न देश्यस्य इति ज्ञापनार्थम् । संस्कृत-
समन्तु संस्कृतलक्षणेनैव गतार्थम् । प्राकृते
प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृ-
तवद्वेदित्याः । लोकादिति च वर्त्तते । तेन ऋ
ॠ ऌ ॡ ऐ औ ङ ञ श ष विसर्ज्जनीयप्लुतवर्जो
वर्णसमाम्नायो लोकादवगन्तव्यः। ङञौ स्ववर्ग्य-
संयुक्तौ भवत एव । ऐदौ तौ च केषाञ्चित् ।
कैतवं कैअवम् । सौदर्य्यं सौअरिअम् । कौरवाः
कौअवा । तथा स्वरव्यञ्जनं द्विवचनं चतुर्थी-
बहुवचनञ्च न तु भवति । अबहुलं बहुल-
मित्यधिकृतं वेदितव्यमाशास्त्रपरिसमाप्तेः ।
ततश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्-
विभाषा क्वचिदन्यदेव भवति । इति हेमचन्द्र-
कृतशब्दानुशासनवृत्तौ अष्टमाध्यायस्य चतुर्थः
पादः ॥*॥ (यथा च प्राकृतचन्द्रिकायाम् ।
“प्रकृतिः संस्कृतं तत्र भवत्वात् प्राकृतं स्मृतं
तद्भवं तत्समं देशीत्येवमेतत् त्रिधा मतम् ॥”
चण्डाचार्य्यादयस्तु आर्षप्राकृतभेदेन प्राकृतं
द्विविधं कल्पयन्ति । जैनबौद्धानां शास्त्रेषु
प्राचीनतमनाटकादिषु च आर्षप्राकृतप्रयोगः
प्रायशो दृश्यते ॥ कानिचित् विशेषलक्षणानि
प्राकृतचन्द्रिकायामुक्तानि । यथा,—
“तच्चार्षं मागधी शौरसेनी पैशाचिकी तथा ।
चूलिका पैशाचिकञ्चापभ्रंशश्चेति षड्विधम् ॥
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः ।
आकरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥”
नाटकादौ उत्तमस्यापि नायकादेः कदाचित्
मत्तादिदोषोपहतस्य प्राकृतकथनं नैव दोषाय
यदुक्तं तत्रैव ।
“ऐश्वर्य्यादिप्रमत्तस्य दारिद्र्योपद्रुतस्य च ।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीड़ार्थं नृपतेरिष्टं प्राकृतञ्च द्विजन्मनाम् ।
भरतेनोदितं प्राज्ञ्यमबाधितमिदं वचः ॥”
नाटकादौ बालस्त्रीवृद्धादीनामगुणान्वितानां
प्राकृतकथनमेव युक्ततरम् । यथाह भरद्वाजः ।
“गाथासु तु महाराष्ट्रा अन्या नाट्याश्रया
मताः ।
बालस्त्रीवृद्धभिक्षूणां श्रावकव्याजलिङ्गिनाम् ।
ग्रहोपसृष्टमत्तानां प्राकृतं षण्डरूपिणाम् ॥”*
प्रलयविशेषे, पुं । यथा, विष्णुपुराणे । १।७ ।
३८—३९ ।
“नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः ।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥”
प्राकृतज्वर,पुं,(प्राकृतः प्रकृतिसम्बन्धी ज्वरः ।
वर्षाशरद्वसन्तेषु त्रिषु, ऋतुषु क्रमेण वातपित्त-
कफज्वरः । यथा, माधवकरः ।
“वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥”